# सङ्कलनात्मकमूल्यांकनम्-I, 2016

## संस्कृतम्

अवधि : होरात्रयम् | कक्षा – सप्तमी | पूर्णाङ्काः – शतम्

**Date : 22.09.2016**

निर्देशाः – 1. सर्वे प्रश्नाः अनिवार्याः ।

2. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन एव लेखितव्यानि ।

3. सर्वेषां प्रश्नानाम् उत्तराणि खण्डक्रमानुसारणैव लेखनीयानि ।

## खण्डः 'क' (अपठितावबोधनम् – 10 अङ्काः)

**प्र.1 अधोलिखितं गद्यावतरणं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत –**

एकस्मिन् वने एकः जीवकः नाम सिंहः वसति स्म । एकदा एकः मूषकः तत्र अगच्छत् । सः सुप्तस्य सिंहस्य पृष्ठे अनृत्यत् तस्य केशान् च अकृन्तत् । सिंहः क्रोधितः अभवत् । एतत् दृष्ट्वा मूषकः अवदत् – 'कृपाम् कुरु माम् च न मारय इति ।'

**I. विकल्पात् पदं चित्वा एकपदेन उत्तरत –** **(1×4=4)**

क) जीवकः कः आसीत् ? (मूषकः / सिंहः)

ख) कः क्रोधितः अभवत् । (सिंहः / मूषकः)

ग) सिंहस्य पृष्ठे कः नृत्यम् अकरोत् ? (जीवकः / मूषकः)

घ) सिंहः कुत्र अवसत् ? (कुटजे / वने)

**II. एकवाक्येन उत्तरत –** **(2×2=4)**

क) मूषकः सिंहम् किम् अवदत् ?

ख) मूषकः सिंहस्य समीपे गत्वा किम् अकरोत् ?

**III. यथानिर्देशम् उत्तरत –** **(1×2=2)**

क) 'मूषकः' इति पदस्य विभक्तिं वचनम् च लिखत । (षष्ठी, एकवचनम् / प्रथमा, एकवचनम्)

ख) अर्थम् चित्वा लिखत ।

'पृष्ठे'

अ) पीठ पर ब) पत्ते पर

## खण्डः 'ख' (रचनात्मकं कार्यम् – 20 अङ्काः)

**प्र.2 अधोलिखितसंवादे रिक्तस्थानानि मञ्जूषायाः समुचितपदैः पूरयत –** **(1×5=5)**

राधा – हे वीराः । यूयम् कुत्र गच्छथ ?

सैनिकः – राधे वयम् कश्मीरप्रदेशम् प्रति (1)__________ ।

सन्दीपः – किम् त्वम् तत्र गत्वा (2)__________ रक्षसि ?

सैनिकः – आम् अहम् देशम् (3)__________ ।

हेमन्तः – भो सैनिक । तव हस्ते इदम् (4)__________ अस्ति ?

सैनिकः – मम हस्ते भुशुण्डी (5)__________ ।

सन्दीपः – भो सैनिकाः शुभस्ते पन्थानः सन्तु ।

**मञ्जूषा** – अस्ति, किम्, रक्षामि, देशम्, गच्छामः

**प्र.3 शुल्कक्षमापनाय प्राचार्यं प्रति पत्रम् लिखत ।** **(½×10=5)**

**मञ्जूषा** - लिपिकः, निवेदनम्, सदस्याः, वेतनम्, भवति, अतिकठिनम्, व्यवधानम्, अनुगृह्णन्तु, मोचयित्वा, यत्

श्रीमान् प्राचार्य महोदयः,
ओ. पी. जिंदल विद्यालयः,
रायगढ़ ।

श्रीमन् !

सेवायाम् सविनयम् (i)________ अस्ति, यत् मम पिता एकः (ii)________ अस्ति । तस्य (iii)________ पंचसहस्रमेव अस्ति । मम परिवारे चत्वारः (iv)________ सन्ति । तेषां पालनपोषणम् (v)________ । विद्यालयस्य शिक्षाशुल्क प्रदानम् तु कठिनतरम् (vi)________ । धनाभावेन कदाचित् मम अध्ययने (vii)________ न स्यात् । अतः मम प्रार्थना (viii)________ शिक्षा-शुल्क-प्रदानात् (ix)________ माम् (x)________ ।

भवदीया शिष्या
लता

**प्र.4 मञ्जूषायाः शब्दानां सहायतया चित्रमाधृत्य पञ्चवाक्यानि लिखत -** **(2×5=10)**

**मञ्जूषा** - कुम्भकारस्य, घटान्, शरावान्, पात्रान्, रचयति, मृत्तिकया, कुटजः, करोति, अस्ति, वृक्षः, एतत् चित्रम्, सन्ति



## खण्डः 'ग' (अनुप्रयुक्तव्याकरणम् - 20 अङ्काः)

**प्र.5 रेखांकितपदेषु सन्धिं विच्छेदं वा चिनुत ।** **(1×4=4)**

क) महोदय ! अत्र पश्य ।
  अ) महा + उदय  ब) महोद + य  स) म + होदय

ख) सर्वप्रथमम् गण + ईशम् पूजयामि ।
  अ) गणयिषम्  ब) गणेशम्  स) गणयेशम्

ग) अस्माकं विद्यालये अद्यावकाशः अस्ति ।
  अ) अद्य + अवकाशः  ब) आद्या + अवकाशः  स) अद्या + आवकाशः

घ) हिम + आलयः भारतस्य रक्षकः ।
  अ) हीमालयाः  ब) हिमालयः  स) हिमलयाः

**प्र.6 अधोलिखित वाक्येषु अंकानां स्थाने शब्देषु समयं चित्वा लिखत -** **(1×4=4)**

क) रामः <u>5:45</u> वादने उत्तिष्ठति । (पादोनषड् / सपादसप्त)

ख) सः <u>8:00</u> वादने विद्यालयं गच्छति । (सपादअष्ट / अष्ट)

ग) सः <u>4:30</u> वादने विद्यालयात् गृहं आगच्छति । (सार्द्धचतुर् / सपाद-पञ्च)

घ) सः सायं <u>5:15</u> वादने क्रीडति । (सपादषड् / सपाद-पञ्च)

**प्र.7 अधोलिखितवर्णयोः उच्चारणस्थानं चित्वा लिखत -** **(1×2=2)**

क) 'च' वर्गस्य नासिक्यं वर्णम् लिखत ।

अ) ट् ब) ञ् स) प्

ख) कस्य वर्णस्य उच्चारणस्थानम् कण्ठः अस्ति ?

अ) ओ ब) क् स) च्

**प्र.8 अधोलिखितस्य वर्णविन्यासं संयोजनं वा चिनुत -** **(1×2=2)**

क) मित्रेण

अ) म् + इ +। त् + र् + ए + ण् + अ

ब) म् + आ + त्र् + ए + ण् + अ

ख) ब् + आ + ल् + अ + क् + आः

अ) बालक

ब) बालकाः

**प्र.9 अधोलिखितविकल्पेषु निर्देशानुरूपं शब्दरूपं चित्वा लिखत -** **(1×4=4)**

क) 'लता' शब्दस्य <u>तृतीया एकवचने</u> किं रूपं भविष्यति ?

अ) लतयोः ब) लतया स) लताः

ख) 'फल' शब्दस्य <u>द्वितीया एकवचने</u> किं रूपं भविष्यति ?

अ) फलेभ्यः ब) फलम् स) फलात्

ग) 'अस्मद' शब्दस्य <u>प्रथमा एकवचने</u> किं रूपं भविष्यति ?

अ) आवाभ्याम् ब) मम स) अहम्

घ) 'किम्' (पु.) शब्दस्य <u>चतुर्थी एकवचने</u> किं रूपं भविष्यति ?

अ) कस्मै ब) कः स) कान्

**प्र.10 अधोलिखित विकल्पेषु निर्देशानुरूपं धातुरूपं चित्वा लिखत -** **(1×4=4)**

क) 'नम्' धातोः लट् लकारस्य 'प्रथमपुरुषस्य बहुवचने' किं रूपं भविष्यति ?

अ) नंस्यामि ब) नमन्ति स) नमसि

ख) 'पठ्' धातोः लङ् लकारस्य 'उत्तमपुरुषस्य बहुवचने' किं रूपं भविष्यति ?

अ) अपठाम ब) अपचत् स) अचलन्

ग) 'खाद्' धातोः लृट् लकारस्य 'मध्यमपुरुषस्य एकवचने' किं रूपं भविष्यति ?

अ) खादति ब) अखादत स) खादिष्यसि

घ) 'गम्' धातोः लट् लकारस्य 'उत्तमपुरुषस्य एकवचने' किं रूपं भविष्यति ?

अ) गच्छामि ब) पतामः स) पतामि

## खण्डः 'घ' (पठितावबोधनम् – 50 अङ्काः)

**प्र.11 अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत –**

स्त्रीशिक्षायाः क्षेत्रे अग्रगण्या पण्डिता रमाबाई 1858 तमे ख्रिष्टाब्दे जन्म अलभत । तस्याः पिता अनन्तशास्त्री डोंगरे माता च लक्ष्मीबाई आस्ताम् । तस्मिन् काले स्त्रीशिक्षायाः स्थितिः चिन्तनीया आसीत् । स्त्रीणां कृते संस्कृतशिक्षणं प्रायः प्रचलितं नासीत् । किन्तु डोंगरे रूढ़िबद्धां धारणां परित्यज्य स्वपत्नीं संस्कृतम् अध्यापयत् । एदतर्थं सः (अनन्तशास्त्री) समाजस्य प्रतारणाम् अपि असहत ।

**(I) एकपदेन उत्तरत –** **(1×4=4)**

क) स्त्रीशिक्षाक्षेत्रे अग्रगण्या का ? (लताबाई / रमाबाई)

ख) तस्याः पितुः नाम किम् ? (अनन्तशास्त्री डोंगरे / लक्ष्मीबाई)

ग) तस्मिन् काले कस्याः स्थितिः चिन्तनीया आसीत् ? (स्त्रीशिक्षायाः / धारणायाः)

घ) केषां कृते संस्कृतशिक्षणं प्रायः प्रचलितं नासीत् ? (वृक्षाणाम् / स्त्रीणाम्)

**(II) पूर्णवाक्येन उत्तरत –** **(2×2=4)**

क) पण्डिता रमाबाई कदा जन्म अलभत् ?

ख) अनन्तशास्त्री कस्य प्रतारणाम् असहत् ?

**(III) निर्देशानुसारम् उत्तरत –** **(1×2=2)**

क) 'स्त्रीणाम्' इति पदे विभक्तिं वचनं च लिखत । (षष्ठी बहुवचनम् / प्रथमा बहुवचनम्)

ख) 'अध्यापयत्' इति पदस्य कर्तृपदं किम् ? (किन्तु / डोंगरे)

**प्र.12 अधोलिखित प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखत –** **(2×5=10)**

क) कूर्मः केन मार्गेण अन्यत्र गन्तुम् इच्छति ? (आकाशमार्गेण / श्वः)

ख) रमाबाई उच्चशिक्षार्थं कुत्र अगच्छत् ? (ब्रह्मसमाजम् / इंग्लैण्डदेशम्)

ग) लोके पुनः-पुनः कानि भवन्ति ? (शरीराणि / वनम्)

घ) मञ्चे कति बालकवयः उपविष्टाः सन्ति ? (शतम् / चत्वारः)

ङ) कः श्मशाने वसति ? (बालकाः / शिवः)

**प्र.13 रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत –** **(1×5=5)**

क) <u>वसुन्धरा</u> बहुरत्ना भवति ।

ख) <u>सत्येन</u> वाति वायुः ।

ग) रमाबाई <u>मुम्बईनगरे</u> शारदा सदनम् अस्थापयत् ।

घ) <u>मृत्युः</u> न प्रतीक्षते ।

ङ) <u>रमायाः</u> पिता समाजस्य प्रतारणाम् असहत ।

**प्र.14 मञ्जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत –** **(1×5=5)**

**मञ्जूषा –** द्वौ, उड्डीयते, षड्, च, इच्छामि

क) लता मेघा ............... विद्यालयं गच्छतः ।

ख) ऋतवः ............... भवन्ति ।

ग) मम शरीरे ............... हस्तौ स्तः ।

घ) अहं आकाशमार्गेण अन्यत्र गन्तुम् ............... ।

ङ) हंसाभ्याम् सह कूर्मोऽपि ............... ।

**प्र.15 अधोलिखितानां पदानां विभक्तिं वचनञ्च लिखत –** **(1×5=5)**

| | **विभक्तिम्** | **वचनम्** |
|---|---|---|
| क) बालकात् | …………. | …………. |
| ख) पिता | …………. | …………. |
| ग) मनोरमया | …………. | …………. |
| घ) शिक्षायै | …………. | …………. |
| द) कन्याः | …………. | …………. |

**प्र.16 मञ्जूषातः समानार्थकपदानि चित्वा लिखत –** **(1×5=5)**

**मञ्जूषा** | हर्षस्य, शरीरस्य, मौनम्, प्राप्य, चिकित्सकम् |

क) तूष्णीम्

ख) प्रसन्नतायाः

ग) वैद्यम्

घ) देहस्य

ङ) लब्ध्वा

**प्र.17 मञ्जूषातः विलोमपदानि चित्वा लिखत –** **(1×5=5)**

**मञ्जूषा** | नीचैः, सुलभम्, सुबुद्धे !, अन्तः, असत्यम् |

क) सत्यम्

ख) दुर्बुद्धे !

ग) बहिः

घ) दुर्लभम्

ङ) उच्चैः

**प्र.18 कोष्ठकेभ्यः उचितपदैः रिक्तस्थानानि पूरयत –** **(1×5=5)**

क) असत्यं …………. वक्तव्यम् । (आम् / न)

ख) महात्मागान्धी …………. अहिंसा न अत्यजत् । (कदाचन् / सदा)

ग) वर्षाकाले गृहात् …………. मा गच्छ । (अलम् / बहिः)

घ) मासाः …………. भवन्ति । (द्वादश / विंशतिः)

ङ) फरवरी मासे सामान्यतः …………. दिनानि भवन्ति । (अष्टाविंशतिः / पञ्चाशत्)